# Shivaproktam Shivapujopakaranam

# શિવપ્રોક્તં શિવપૂજોપકરણમ્

## Document Information

Text title : Shivaproktam Shivapujopakaranam

File name : shivapUjopakaraNamshivaproktaM.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 17 | 1-61||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 4, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં શિવપૂજોપકરણમ્

(શિવગૌરીસંવાદે)

શ્રીશિવ ઉવાચ -

અથાતઃ સમ્પ્રવક્ષ્યામિ પૂજોપકરણં શિવે ।
આધિકાર્યપિ પૂજાયામુચ્યતે શ‍ૃણુ સાદરમ્ ॥ ૧॥

બ્રહ્મક્ષત્રિયવિટ્છૂદ્રદેવગન્ધર્વમાનવાઃ ।
યક્ષાદયોઽપીષ્ટસિદ્ધ્યૈ મામીશં પૂજયન્તિ હિ ॥ ૨॥

બ્રાહ્મણૈર્દેવમુનિભિર્દેવૈશ્ચાહરહઃ શિવે ।
વેદમન્ત્રૈરહં પૂજ્યસ્તદન્યૈસ્તન્ત્રમાર્ગતઃ ॥ ૩॥

આદૌ મત્પૂજનાત્પૂર્વં યત્કર્તન્ચં તદુચ્યતે ।
કર્તવ્યકરણાભાવે નાધિકારી ભવિષ્યતિ ॥ ૪॥

પ્રાતઃ શૌચાદિકં કૃત્વા સ્નાનં કાર્યં પ્રયત્નતઃ ।
રુદ્રસૂક્તૈર્માર્જનં ચ કર્તવ્યં સ્નાનતત્પરૈઃ ॥ ૫॥

જલે નિમજ્જ્ય મામીશં ધ્યાત્વા સામ્બં મહેશ્વરમ્ ।
મહાદેવેતિ મન્ત્રોઽયં જપનીયોઽષ્ટશઃ શિવે ॥ ૬॥

તતઃ પ્રયત્નતો દેવિ કર્તવ્યં જલતર્પણમ્ ।
પરિધાનં તતઃ કાર્યં વસ્ત્રચીરાદિભિઃ શિવે ॥ ૭॥

તદતન્તરમાચમ્ય ભસ્મ ગ્રાહ્યં પ્રયત્નતઃ ।
સદ્યોજાતાદિભિર્ભસ્મ તતઃ સમભિમન્ત્રયેત્ ॥ ૮॥

તતઃ શરીરં સર્વાઙ્ગં ભસ્મનોદ્ધૂલયેત્તતઃ ।
ત્રિપુણ્ડ્રધારણં કૃત્વા જાબાલોપનિષત્ક્રમાત્ ॥ ૯॥

રુદ્રાક્ષધારણં કાર્યં તતોઽઙ્ગેષુ યથાક્રમમ્ ।
તતઃ સન્ધ્યા પ્રયત્નેન કર્તવ્યા સકુશામ્ભસા ॥ ૧૦॥

ગોમયેન ભુવં સમ્યગનુલિપ્યોત્ક્ષિપ્પેજ્જલમ્ ।
કુશાસનોપવિષ્ટઃ સન્પૂજાદ્રવ્યાણિ સાધયેત્ ॥ ૧૧॥

અષ્ટૌ પાત્રાણિ સઙ્ગ્રાહ્યાણ્યર્ઘ્યાર્થમતિશોભિતે ॥ ૧૨॥

તાનિ સમ્પ્રોક્ષ્ય સકુશં જલં તેષુ પ્રપૂરયેત્ ।
પૂજયિત્વા તતો મન્ત્રી શુદ્ધશૈવં જપેત્તતઃ ॥ ૧૩॥

સૌવર્ણં રાજતં તામ્રમથવા મૃણ્મયં શિવે ।
શિવલિઙ્ગાભિષેકાય પાત્રં ગ્રાહ્યં પ્રયત્નતઃ ॥ ૧૪॥

બિલ્વપત્રાણિ તત્પાત્રે સ્થાપનીયાનિ યત્નતઃ ।
તદુપર્યેવ સંસ્થાપ્યં શિવલિઙ્ગં પ્રયત્નતઃ ॥ ૧૫॥

તતો રૌદ્રેણ મન્ત્રેણ સમ્પ્રોક્ષ્યાર્ચનસાધનમ્ ।
ભસ્મનાઙ્ગાનિ સમ્મૃજ્ય સઙ્કલ્પં ચ સમાચરેત્ ॥ ૧૬॥

તતઃ કુન્દેન્દુધવલં મામુમારમણં શિવમ્ ।
ધ્યાત્વા નમઃ શિવાયેતિ મન્ત્રેણ સમુપસ્પૃશેત્ ॥ ૧૭॥

જલકુમ્ભં ભસ્મપૂતં સ્પૃષ્ટ્વા મૂલમનું પઠેત્ ।
મૂલમન્ત્રસ્તુ સર્વત્ર શિવપઞ્ચાક્ષરઃ સ્મૃતઃ ॥ ૧૮॥

પઠનીયોઽન્યમન્ત્રાન્તે મૂલમન્ત્રસ્તુ સર્વતઃ ।
મૂલમન્ત્રોપમન્ત્રાસ્તુ સર્વેમન્ત્રા યતઃ સ્મૃતાઃ ॥ ૧૯॥

સુગન્ધિજલમીશાન પવિત્ર કલશાહૃતમ્ ।
અભિષેકાર્થમમલમર્ઘ્યાર્થં ચ મહેશ્વર ॥ ૨૦॥

ઇત્યુક્ત્વા શઙ્કરં ધ્યાત્વા સર્વદેવશિખામણિમ્ ।
પઞ્ચાક્ષરજપઃ કાર્યો દશવારં પ્રયત્નતઃ ॥ ૨૧॥

તતોઽષ્ટમૂર્તયે મહ્યમર્ઘ્યાણ્યપિ નિવેદયેત્ ।
અર્ઘ્યમન્ત્રાશ્ચ વિવિધાસ્તેઽપ્યુન્તે મયાધુના ॥ ૨૨॥

પૃથિવીવિશ્વરૂપેશ પૃથિવીજનક પ્રભો ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૨૩॥

જલરૂપ મહાદેવ જલપ્રભવકારણ ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૨૪॥

તેજોરૂપ મહેશાન તેજોજનક શઙ્કર ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૨૫॥

વાયુસ્વરૂપ માયાત્મન્વાયુપ્રભવકારણ ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૨૬॥

આકાશરૂપ સર્વેશ વ્યોમોત્પત્ત્યેકકારણ ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૨૭॥

સૂર્યસ્વરૂપ સૂર્યેશ શિવ સૂર્યૈકકારણ ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૨૮॥

ચન્દ્રસ્વરૂપ ચન્દ્રાત્મંશ્ચન્દ્રશેખર સર્વગ ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૨૯॥

યજ્વમૂર્તે જગન્મૂર્તે યજ્ઞકર્મફલપ્રદ ।
ગૃહાણાર્ઘ્યમિદં શમ્ભો પ્રસીદ સુરસત્તમ ॥ ૩૦॥

અષ્ટાવર્ઘ્યાણિ દેયાનિ મન્ત્રૈરેતૈર્યથાક્રમમ્ ।
શ્વેતશાલ્યક્ષતાપ્લુષ્ટબિલ્વપત્રયુતૈર્જલૈઃ ॥ ૩૧॥

તતઃ પઞ્ચામૃતૈઃ શુદ્ધૈરભિષેકં સમાચરેત્ ।
પઞ્ચામૃતસ્નાનમધ્યે જલસ્નાનં સમાચરેત્ ॥ ૩૨॥

ક્ષીરં ગવ્યમિદં શુદ્ધં જલસંયુતમીશ્વર ।
અભિષેકાર્થમાનીતં ગૃહાણેદં મહેશ્વર ॥ ૩૩॥

દધિગવ્યમિદં શુદ્ધં પરિષ્કૃતમુમાપતે ।
અભિષેકાર્થમાનીતં ગૃહાણેદં મહેશ્વર ॥ ૩૪॥

ઘૃતમેતન્મહાદેવ સુગન્ધં ગવ્યમુત્તમમ્ ।
અભિષેકાર્થમાનીતં ગૃહાણેદં મહેશ્વર ॥ ૩૫॥

નવં મધુ સમાનીતમિદં કીટાદ્યદૂષિતમ્ ।
અભિષેકાર્થમાનીતં ગૃહાણેદં મહેશ્વર ॥ ૩૬॥

શર્કરેયં સમાનીતા સીતાકીટાપ્રદૂષિતા ।
અભિષેકાર્થમાનીતા ગૃહાણેમાં મહેશ્વર ॥ ૩૭॥

એવં પઞ્ચામૃતૈરીશમભિષિચ્ય તતઃ પરમ્ ।
સાઙ્ગેન નમકેનેશં સાઙ્ગં મામભિષેચયેત્ ॥ ૩૮॥

જલધારામવિચ્છિન્નાં ભક્ત્યા સમ્પાદયેદપિ ।
સા ધારાઽમૃતધારા સા મુક્તિધારા મમ પ્રિયા ॥ ૩૯॥

તતસ્તુઃ કલ્પનીયં વૈ બિલ્વપત્રોત્તરાસનમ્ ।
હેમાદિનિર્મિતં દિવ્યં મૂલમન્ત્રેણ ભક્તિતઃ ॥ ૪૦॥

તતો નવેન શુદ્ધેન વસ્ત્રેણ પરિવૃત્ય મામ્ ।
સિતેન ભસ્મના સમ્યગર્ચયેન્મૂલમન્ત્રતઃ ॥ ૪૧॥

ચન્દનેન સુગન્ધેન મૂલમન્ત્રેણ પૂજયેત્ ।
મધ્યે ત્વેકૈકપૂજાન્તે દેયમાચમનં મમ ॥ ૪૨॥

તતઃ શાલ્યક્ષતૈઃશ્વેતૈરર્ચયેન્માં તિલાન્વિતૈઃ ।
તતો બિલ્વદલૈઃ શુદ્ધૈરર્ચયેદઘનાશકૈઃ ॥ ૪૩॥

બિલ્વપત્રં ગૃહાણેશ બિલ્વપત્રપ્રિય પ્રભો ।
પ્રસીદ ભગવન્ શમ્ભો પાતકાનિ હરસ્વ મે ॥ ૪૪॥

અમું મન્ત્રં સમુચ્ચાર્ય મૂલમન્ત્રમપિ પ્રિયે ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય પુષ્પૈરપિ સમર્ચયેત્ ॥ ૪૫॥

સાજ્યેનાગરુસારેણ સુગન્ધેન મહેશ્વરિ ।
ધૂપસ્તતઃ કલ્પનીયો મહ્યં યત્નપુરઃસરમ્ ॥ ૪૬॥

ધૂપં ગૃહાણ દેવેશ સુગન્ધં સવૃતં શિવ ।
પાતકાનિ હરસ્વેશ ધૂપદાનેન સાદરમ્ ॥ ૪૭॥

દીપં ગૃહાણ દેવેશ પાતકધ્વાન્તનાશક ।
પ્રસીદ પાર્વતીનાથ દીનવન્ધો દયાનિધે ॥ ૪૮॥

ઇતિ દત્ત્વા ધૂપદીપૌ નૈવેદ્યં પરિકલ્પયેત્ ।
તતઃ પરં કલ્પનીયં કરોદ્વર્તનમાદરાત્ ॥ ૪૯॥

તતઃ પરં ધૂપદીપૌ તામ્બૂલં ચ તતઃ પરમ્ ।
તતઃ પુનર્દીપદા દેયાવત્યન્તભક્તિતઃ ॥ ૫૦॥

ગૃહાણ પરમેશાન તામ્બૂલમિદમુત્તમમ ।
એલાલવઙ્ગકર્પૂરપરિષ્કૃતમુમાપતે ॥ ૫૧॥

તતઃ પ્રદક્ષિણા કાર્યા દ્વાદશૈકાદશાથવા ।

તતઃ પ્રણામાઃ કર્તવ્યા એક વિંશતિસઙ્ખ્યયા ॥ ૫૨॥

નર્તનં ચ તતઃ કાર્યં સામ્બધ્યાનપુરસ્સરમ્ ।
શિવપઞ્ચાક્ષરઃ શુદ્ધો જપનીયઃ પ્રયત્નતઃ ॥ ૫૩॥

અષ્ટોત્તરસહસ્રં તુ ન્યાસધ્યાનપુરઃસરમ્ ।
શિવપઞ્ચાક્ષરો જપ્યો યદ્વા ન્યાસાદિકં વિના ॥ ૫૪॥

તતઃ પરં બિલ્વપત્રૈઃ પુષ્પૈર્નાનાવિધૈરપિ ।
પુનઃ પૂજા પ્રયત્નેન કર્તવ્યા મહ્યમાદરાત્ ॥ ૫૫॥

તતો નાનાવિધૈઃ સ્તોત્રૈઃ સ્તોતવ્યોઽહં પ્રયત્નતઃ ।
તતશ્છત્રં ચામરં ચ દર્પણં ચ નિવેદયેત્ ॥ ૫૬॥

પુનર્નત્વા ક્ષમસ્વેતિ સંસ્પૃશેદ્ધ્યાનપૂર્વકમ્ ।
સ્પર્શં કૃત્વા પુનર્મન્ત્રમમુમેવ પઠેચ્છિવે ॥ ૫૭॥

અયં મે ઇતિ મન્ત્રેણ સ્પૃષ્ટ્વા હસ્તતલેન મામ્ ।
અષ્ટોત્તરશતં મન્ત્રો જપનીયઃ ષડક્ષરઃ ॥ ૫૮॥

એવં પૂજાઽન્વહં કાર્યા ત્રિષુ લોકેષુ સાદરમ્ ।
નિત્યપૂજેયમમલે ભુક્તિમુક્તિફલપ્રદા ॥ ૫૯॥

પ્રાતઃ સન્ધ્યાં વિધાયાદૌ પૂજનીયોઽન્વહં શિવે ।
કાર્યમન્યન્ન કર્તવ્યં મામનભ્યર્ચ્ય સાદરમ્ ॥ ૬૦॥

એવં પ્રયત્નતઃ કાર્યં શક્તેન મમ પૂજને ।
યથાકથઞ્ચિત્ કર્તવ્યમશક્તેનાપિ સર્વથા ॥ ૬૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં શિવપૂજોપકરણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૭ । ૧-૬૧ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 17 . 1-61 ..

Notes:

Śiva શિવ details to Pārvatī પાર્વતી about the means and procedures of conducting Śiva Pūjā શિવ પૂજા.

He mentions about worshipping His AṣṭaMūrtī અષ્ટમૂર્તી forms (that correspond to the AṣṭaVasu અષ્ટવસુ) viz., Viśvarūpeśa વિશ્વરૂપેશ (Pṛthivī પૃથિવી), Mahādeva મહાદેવ Jala જલ,

Maheśa મહેશ Teja તેજ, Māyātman માયાત્મન્ Vāyu વાયુ, Sarveśa સર્વેશ Ākāśa આકાશ, Sūryeśa સૂર્યેશ Sūrya સૂર્ય, Candraśekhara ચન્દ્રશેખર Candra ચન્દ્ર, Jaganmūrtī જગન્મૂર્તી Yajñamūrtī યજ્ઞમૂર્તી; and that He is the Source of their creation.
He further tells about the use of Pañcāmṛta પઞ્ચામૃત, japa જપ of His Mūla Mantra મૂલ મન્ત્ર - the Pañcākṣara Mantra પઞ્ચાક્ષર મન્ત્ર, Dhyāna ધ્યાન of His AṣṭottaraSahasranāma અષ્ટોત્તરસહસ્રનામ and AṣṭottaraŚataanāma અષ્ટોત્તરશતનામ, and japa જપ of His Ṣaḍakṣara Mantra ષડક્ષર મન્ત્ર.

Encoded and proofread by Ruma Dewan

*Shivaproktam Shivapujopakaranam*

pdf was typeset on May 4, 2024

Please send corrections to *sanskrit@cheerful.com*